हरिद्रा
(सांस्कृतिक शोध का अन्तर्राष्ट्रीय उपक्रम)
ISSN : 2582-9092

# पुराणधर्मशास्त्रयोः वेदारम्भ–समावर्तन–संस्काराभ्यामादर्शजीवनस्वरूपम

कु. अपूर्वा अग्रवालः

**प्रस्तावना** – भारतीयसंस्कृतेः संस्कृतवाङ्मयस्य चाधारो वर्तते ऋग्–यजु–साम–अथर्वभेदेन चत्वारो वेदाः। वेदाः प्रभुसम्मितं सर्वविधधर्माणां, कर्मणां, ज्ञानानाञ्च गूढार्थं सूत्रात्मकरूपेण उपस्थापयन्ति, यैः केचन विद्वांसः एव लाभान्विताः भवन्ति स्म। तेषां वेदविहितानां गूढार्थं सर्वेभ्यः साधारणजनेभ्यः सरलं सुबोधं सुलभञ्च कर्तुं कालान्तरे पुराणानि विरचितानि।

**पुरा नवं भवतीति पुराणम्।**1 अर्थात् यच्छास्त्रमत्यन्तं प्राचीनं सदपि, स्वकीयप्रतिपादितविषयाणां प्रासंगिकतायाः कारणात् सर्वथा नूतनमिव प्रतिभाति, तत् पुराणम्। पुराणानि विविधानां कथा–आख्यान–दृष्टान्तानां माध्यमेन वेदोक्तार्थान् स्वजीवने व्यवहर्तुं मित्रसदृशमुपदिशन्ति । यथा –

**प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च––।।**2

**धारणाद्धर्मः इत्याहुः**3 अर्थात् धरति धारयति वा लोकमिति धर्मः। धर्मः शास्तीति धर्मशास्त्रम्। अर्थात् यस्मिन् शास्त्रे प्राधान्येन धर्मः एव निर्दिश्यते, तद् धर्मशास्त्रमिति।

पुराणानि धर्मशास्त्रञ्च लोके विविधानुकूलप्रतिकूलपरिस्थितिषु आदर्शजीवनं जीवितुं जनेभ्यः अनेकैः दृष्टान्तैः उचितमार्गं प्रदर्शयन्ति। सर्वादौ किं नाम आदर्शजीवनमित्यभिज्ञायते। सुव्यवस्थितं, सुसंस्कृतं, सदाचारयुक्तं, साफल्यं, सुखदं, सन्तुष्टिञ्चप्रदायकं जीवनमादर्शमित्युच्यते। एतादृशमादर्शजीवनं गर्भाधानादिसंस्काराणामनुष्ठानेन सम्पाद्यते ।

**संस्कारो नाम स भवति यस्मिञ्जाते पदार्थो भवति योग्यः कस्यचिदर्थस्य।।**4

समुपसर्गाद् 'डुकृञ् करणे' धातोः भूषणेऽर्थे घञि 'संस्कारः' इति शब्दोऽयं निष्पद्यते। संस्कारैः शारीरिकी मानसिकी च शुद्धता जायते। संस्काराः मानवस्य आत्मानं, शरीरं, मनः, बुद्धिं, कर्म इत्यादीन् संशोध्य, व्यक्तित्वञ्च परिष्कृत्य तस्य जीवनं साधयन्ति। अत एवाह मनुस्मृतौ –

वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च।।5

जन्मनः आरभ्य मृत्युपर्यन्तं मतवैभिन्येनानेके संस्काराः सम्पाद्यन्ते। तेषु वेदारम्भ–समावर्तनसंस्कारयोः मानवस्य जीवनमादर्शेन सिञ्चितुं विशिष्टं महत्त्वं योगदानञ्च वर्तते। अतः सर्वादौ एतयोः संस्कारयोः संक्षेपेण परिचयं प्राप्यते।

**वेदारम्भसंस्कारः** –

वेदानामारम्भः येन जायतेक्रियतेवा तद्वेदारम्भः। अर्थात् चतुर्णां वेदानामध्ययनाय कृतः संस्कारः

ISSN : 2582-9092

वेदारम्भसंस्कार इत्युच्यते। वेदारम्भसंस्कारः उपनयनसंस्कारस्य उत्तरार्धमेव। उपनीयते समीपं प्राप्यते येनाचार्यस्य विद्यायाः च तदुपनयनमिति। उपनयनसंस्कारः गुरुकुले प्रवेशार्थं विधीयते।

गर्भाज्जन्मनः वा अष्टमे वर्षे ब्राह्मणस्य, एकादशे वर्षे क्षत्रियस्य, द्वादशे च वैश्यस्य उपनयनसंस्कारः विधीयते। यथा प्राप्यते मनुस्मृतौ –

**गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् ।**
**गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ।।6**

धर्मशास्त्रानुसारमुपनयनानन्तरं गुरुः स्वशिष्यं शौच–आचार–अग्निकार्य–सन्ध्योपासनादीनां ज्ञानं कारयति । यदुक्तं मनुना –

**उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः।**
**आचारमग्निकार्यञ्च सन्ध्योपासनमेव च।।7**

उपनयनदिवसेऽथवा उपनयनानन्तरमेकवर्षाभ्यन्तरे शुभमुहूर्ते वेदारम्भः समाधेयः । आचार्यः बालकस्य हस्तेन वैदिकरीत्या यज्ञानुष्ठानं कारयित्वा वारत्रयं गायत्रीमन्त्रोपदेशेन वेदाध्ययनमध्यापनञ्च प्रारभते। तत्पूर्वमाचार्यः बालकं ब्रह्मचारिणः कर्त्तव्यानि संसूचयति।

**ब्रह्मचार्यसि ।।1।। अपोऽशान ।।2।। कर्म कुरु ।।3।। दिवा मा स्वाप्सीः ।।4।। आचार्याधीनो वेदमधीष्व ।।5।।8 द्वादश वर्षाणि प्रतिवेदं ब्रह्मचर्यं गृहाण वा ब्रह्मचर्यं चर ।।6।।9 क्रोधानृते वर्जय ।।7।। मैथुनम् ।।8।। उपरि शय्याम् ।।9।। कौशीलवगन्धाञ्जनानि ।।10।। स्नानम् ।।11।।10 क्षुरकृत्यम् ।।12।।11 मांसरूक्षाहारं मद्यादिपानं च वर्जय ।।13।। गवाश्वहस्त्युष्ट्रादियानं वर्जय ।।14।। अन्तर्ग्रामनिवासोपानच्छत्रधारणं वर्जय ।।15।।12 मेखलादण्डधारणभैक्ष्यचर्यसमिदाधानोदकस्पर्शनाचार्यप्रियाचरणप्रातः सायमभिवादनविद्यासंचय – जितेन्द्रियत्वादीन्येते ते नित्यधर्माः ।।16।।13**

गौतमधर्मसूत्रे ब्रह्मचारिणे बालकाय अनेके नियमाः कर्त्तव्यानि च निर्धारितानि सन्ति। तेषु केचन इत्थं वर्तन्ते –

**उक्तं ब्रह्मचर्यम् ।।1।। अग्नीन्धनभैक्षचरणे ।।2।। सत्यवचनम् ।।3।। अपामुपस्पर्शनम् ।।4।।14 नाऽदित्यमीक्षेत ।।5।।15 स्त्रीप्रेक्षणालम्भने मैथुनशङ्कायाम् ।।6।।16 शुक्लवाचो मद्यं नित्यं ब्राह्मणः ।।7।। अधः शय्यासनी पूर्वोत्थायी जघन्यसंवेशी ।।8।। वाग्बाहूदरसंयतः ।।9।।17 शय्यासनस्थानानि विहाय प्रतिश्रवणम् ।।10।।18 गच्छन्तमनुव्रजेत् ।।11।। कर्म विज्ञाप्याऽऽख्याय ।।12।। आहूतोऽध्यायी ।।13।।19 निवेद्य गुरवेऽनुज्ञातो भुञ्जीत ।।14।।20**

ISSN : 2582-9092

एवं वेदमेकं अध्येतुं द्वादशवर्षपर्यन्तं बालकः आचार्येण सह गुरुकुले वसित्वा ब्रह्मचर्यं समाचरेत्। यः बालकः चतुरो वेदानध्येतुमिच्छति सः अष्टाचत्वारिंशद् वर्षं यावत् ब्रह्मचर्यव्रतमाचरेत् ।

**द्वादश वर्षाण्येकवेदे ब्रह्मचर्यं चरेत्।।**
**प्रतिद्वादश वा सर्वेषु।।21**

अनेन प्रकारेण गुरुकुलेषु छात्राः तपश्चर्यया शास्त्राध्ययनं वेदारम्भसंस्कारेणैव प्रारभन्ते।

**समावर्तनसंस्कारः –**

समावर्तनं नाम वेदाध्ययनानन्तरं गुरुकुलात् स्वगृहागमनम्। समावर्तनसंस्कारः गुरुकुलात् प्रत्यवर्तनार्थं विधीयते। संस्कारोऽयं स्नानं नाम्नाप्यभिधीयते। समावर्तनात् प्राक् विद्यार्जनानन्तरं बालकः केनापि स्वरूपेण आचार्याय दक्षिणां प्रदातुं निवेदयति। गुरुदक्षिणया आचार्यं सन्तुष्ट्य, सहर्षं गृहं प्रत्यागमनायानुमतिञ्च स्वीकरोति। तत्पश्चादाचार्येण शिष्यस्य समावर्तनसंस्कारः विधीयते।

**विद्यान्ते गुरुरर्थेन निमन्त्र्यः।।**
**कृत्वाऽनुज्ञातस्य वा स्नानम्।।22**

समावर्तनसंस्कारे दक्षिणायाः माहात्म्यं वर्तते। शिष्यः विद्याध्ययनकालपर्यन्तं गुरवे किमपि न समर्पयति। सः विद्याध्ययनं पश्चात् स्वशक्त्यानुगुणं गुरवे भूमिं, सुवर्णं, ग्राम्, अश्वं, छत्रम्, उपानहं, धान्यं, शाकमित्यादीनिवस्तूनि समर्प्य तं सन्तोषयति।

**न पूर्वं गुरवे किञ्चिदुपकुर्वीत धर्मवित् ।**
**स्नास्यंस्तु गुरुणाऽऽज्ञप्तः शक्त्या गुर्वर्थमाहरेत्।।**

**क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमन्ततः ।**
**धान्यं वासांसि शाकं वा गुरवे प्रीतिमाहरन्।।23**

ब्रह्मचारी शिष्यः वेदाध्ययनं समाप्य, दक्षिणादानेन च गुरुं प्रसन्नं कृत्वा, गृहं प्रत्यागमनं पश्चाद् विवाहसंस्कारं सम्पाद्य गृहस्थाश्रमं प्रविशति। आचार्यः समावर्तनसमये गृहस्थाश्रमे प्रवेशार्थं शिष्याय काञ्चन उपदेशान् यच्छति।

**वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्।**

**मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि। तानि त्वयोपास्यानि। नो इतराणि। ये के चास्मच्छ्रेयांसो ब्राह्मणाः। तेषां त्वयाऽऽसनेन प्रश्वसितव्यम्। श्रद्धया देयम्। अश्रद्धयादेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्।**

अनेन प्रकारेण वेदारम्भ–समावर्तन–संस्कारयोः माध्यमेन ब्रह्मचर्यव्रतपालनेन च आचार्यः शिष्यं सदाचार–संयम–शील–सत्य–स्वाध्याय–सत्संग–सन्मार्गदर्शनानां शिक्षां प्रददाति । आचार्यः धर्मनियन्त्रित–अर्थोपार्जनस्य एवञ्च कामद्वारा मोक्षोपयोगीजीवनाय अनुपमां विद्यां प्रयच्छति।

**पुराणोक्तानि वेदारम्भ–समावर्तन–संस्कारयोरुदाहरणानि –**

एतौ वेदारम्भ–समावर्तन–संस्कारौ शिक्षायाः पूर्णतायाः साधनमेव। पुराणेष्वनेकान्युदाहरणानि प्राप्यन्ते यत्र वेदारम्भ–समावर्तन–संस्कारयोः मानवजीवने प्रभावः दरीदृश्यते। यथा श्रीमद्भागवतपुराणस्य दशमस्कन्धस्यपञ्चचत्वारिंशोऽध्याये भगवतः श्रीकृष्णस्य बलरामस्य च यज्ञोपवीतसंस्कारानन्तरं विद्यारम्भः, ब्रह्मचर्यव्रतं, गुरुसेवा, गुरुभक्तिः, गुरुदक्षिणायै समर्पणभावः च वर्णितोऽस्ति ।

**अथ शूरसुतो राजन् पुत्रयोः समकारयत् ।**
**पुरोधसा ब्राह्मणैश्च यथावद् द्विजसंस्कृतिम्।।25**

**ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्रतौ ।**
**गर्गाद् यदुकुलाचार्याद् गायत्रं व्रतमास्थितौ।।26**

आचार्येण गर्गेण कृष्ण–बलरामयोः यज्ञोपवीतसंस्कारः विधीतः। तत्पश्चात् तौ बालकौ द्विजत्वं प्राप्तवन्तौ, गायत्रीमन्त्रेण अध्ययनायाखण्डं ब्रह्मचर्यव्रतमपि स्वीकृतवन्तौ। जगदीश्वरौ, सर्वविद्यानां प्रभवौ, सर्वज्ञौ कृष्ण–बलरामावपि उज्जयिनीं गत्वा सान्दीपनिमुनेः गुरुकुले विधिपूर्वकं निवसन्तौ, इष्टदेवसदृशं सभक्त्या, सश्रद्धया गुरोः शुश्रुषाञ्चाकुरुताम्।

**अथो गुरुकुले वासमिच्छन्तावुपजग्मतुः ।**
**काश्यं सान्दीपनिं नाम ह्यवन्तीपुरवासिनम्।।27**

गुरुः सान्दीपनिः तयोः सेवया, गुरुभक्त्या चात्यन्तं प्रसन्नं सन्तुष्टञ्च भूत्वा, तौ चतुर्णां वेदानां, शिक्षादि–षडङ्गानाम्, उपनिषदां, धनुर्वेदस्य, सन्धि–विग्रह–यान–आसन–द्वैध– आश्रयभेदेन षण्णां राजनीतीनां शिक्षामयच्छत्। कृष्ण–बलरामौ चतुःषष्ट्या अहोरात्रैः चतुःषष्टीं कलानपि जज्ञतुः।

**अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः।**
**गुरुदक्षिणयाऽऽचार्यं छन्दयामासतुर्नृप।।28**

ISSN : 2582-9092

सर्वविधविद्याः सम्यग् ज्ञात्वा अध्ययनञ्च समाप्य तौ गुरुं सान्दीपनिं गुरुदक्षिणायै उक्तवन्तौ। गुरुः सान्दीपनिःउक्तवान् यत्, गुरुदक्षिणारूपेणाहं किमपि नेच्छामि, भवन्तौ केवलं मयाध्यापितानां सर्वविधानां विद्यानां लोककल्याणाय सर्वत्र प्रचारं प्रसारञ्चैव कुरुताम्, किंतुकृष्ण–बलरामयोरलौकिकं बुद्धिमद्भुतं महिमानञ्च ज्ञात्वा गुरुपत्नी गुरुदक्षिणारूपेण स्वकीयं मृतं पुत्रं ययाचे।

**––––स महार्णवे मृतं पुत्रं बालं प्रभासे वरयाम्बभूव ह।।29**

गुरुदक्षिणां श्रुत्वा कृष्ण–बलरामौ गुरोः आज्ञया सत्वरं यमराजस्य नगरीं संयमनीं सम्प्राप्य यमराजस्य पार्श्वाद् गुरुपुत्रं नीत्वा स्वगुरुमातरंगुरुञ्च सन्तुष्ट्य पुनराह –

**भूयो वृणीष्वेति।।30**

एवं श्रुत्वा गुरुः तयोः कृष्ण–बलरामयोः भक्तिभावेन, सेवया, गुरुदक्षिणया च बहुसन्तुष्टं प्रसन्नञ्चानुभूयोवाच –

**सम्यक् संपादितो वत्स भवद्भ्यां गुरुनिष्क्रयः।**
**को तु युष्मद्विधगुरोः कामानामवशिष्यते।।**

**गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पावनी।**
**छन्दांस्ययातयामानि भवन्त्विह परत्र च।।31**

गुरोः आज्ञया कृष्ण–बलरामौ स्वगृहं प्रति प्रस्थानमकुरुताम्। अनेन प्रकारेण वेदारम्भ–समावर्तन–संस्कारयोः सम्पादनेन, गुरुकृपया च तयोः कृष्ण–बलरामयोः जीवनं भक्तिभावेन, ज्ञानेन, भावनया, सत्येन, सदाचारेण, सच्चरित्रेण, श्रद्धया, सुविचारेण, सत्कर्मणा च सुसज्जितं, सुसंस्कृतञ्चाभवत् । एतादृशा आदर्शव्यक्तित्वेन न केवलं तयोः जीवनं प्रकाशितं सञ्जातमपितु तेषां प्रभावेण प्रजायाः, अन्येषाञ्च मानवानामपि जीवनमादर्शयुक्तमभवत्।

अन्येषु पुराणेष्वपि एतादृशानि अनेकान्युदाहरणान्युल्लिखितानि सन्ति, यत्र वेदारम्भ–समावर्तन–संस्कारयोः सम्पादनान्तरं मानवस्य जीवनमादर्शत्वेन समुद्भूतम्। न केवलं पुराणेषु, अपितु सम्पूर्णं संस्कृत–वाङ्मये एतादृशान्युदाहरणानि सम्प्राप्यन्ते।

यथा 'रघुवंशम्' महाकाव्ये महाकविना कालिदासेन रघोः उपनयनसंस्कारानन्तरं विद्याग्रहणस्याद्भुतं वर्णनं कृत्वा संस्काराणां महत्त्वमपि प्रतिपादितम्। रघोः उपनयनं पश्चात् लिपेः सम्यग्बोधेन तथैव वैदिकवाङ्मये परिश्रमेण विना शीघ्रमेव तस्य प्रवेशः अभवत्, यथा जलं नद्याः मुखद्वारेण समुद्रं प्रविशति।

**स वृत्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः ।**
**लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत्।।32**

ISSN : 2582-9092

**उपसंहारः –**

वेदारम्भ–समावर्तन–संस्कारौ शैक्षणिकसंस्कारौ स्तः। शिक्षायाः प्रारम्भः समापनञ्चौताभ्यां संस्काराभ्यां वर्तते। वेदारम्भसंस्कारानुष्ठानेन बालकः सश्रद्धया गुरोः सान्निध्यं सम्प्राप्य कल्याणकारिणीं विद्यां लभते। बालकः न केवलं शास्त्रज्ञानमर्जयति, अपितु सदाचरणं कुर्वन् सच्चरित्रमपि धारयति। ब्रह्मचारीव्रतं धारणेन बालकस्य विचारे, वचने, कर्मणि, आचरणे, मनसि, इन्द्रियेषु च संयमः जायते।

समावर्तनसंस्कारानुष्ठानेन मानवः गृहस्थाश्रमे प्रविश्य प्रकृतेः संरक्षणं कुर्वन् सात्विकभावेन भौतिकसुखसुविधानामुपयोगं करोति। सः सर्वदा लोककल्याणाय कार्यं सम्पादयति।

अनेन प्रकारेण संस्काराः मानवस्य दोषान् दूरीकृत्य, तस्य जीवनं सद्गुणैः समलङ्कुर्वन्ति। अद्यतन वैज्ञानिकयुगे मानवस्य कल्याणाय पुराणधर्मशास्त्रयोः वर्णितानां संस्काराणामनुष्ठानमत्यावश्यकमस्ति। अनेनैव मानवः सुसंस्कृतमादर्शजीवनं जीवति, तथा च स्वकीयेनादर्शव्यक्तित्वेन अन्यान् मानवानपि सन्तुष्ट्यादर्शजीवनयापनाय सम्प्रेरयति।

**सन्दर्भग्रन्थसूची –**


1. वायुपुराणम्
2. काव्यप्रकाशः – 1/ 2 (व्याख्याकारः–डॉ. सत्यव्रतसिंहः)
3. महाभारतम् – कर्णपर्व 69/ 58
4. मीमांसाशाबरभाष्यम् – 3/ 1/ 3
5. मनुस्मृतिः – 2/ 26
6. तत्रैव – 2/ 36
7. तत्रैव – 2/ 69
8. आश्वलायनगृह्यसूत्रम् – 1/22/2
9. द्र.– आश्वलायनगृह्यसूत्रम् – 1/22/3,4 तथा पारस्करगृह्यसूत्रम्– 2/5/13–15 इत्यनयोः सम्मिलितरूपम्
10. गोभिलगृह्यसूत्रम् – 3/1/13–18
11. गोभिलगृह्यसूत्रम् – 3/1/20
12. तुलना – गोभिलगृह्यसूत्रम् – 3/1/21–24
13. तुलना – गोभिलगृह्यसूत्रम् – 3/1/25

ISSN : 2582-9092

14. गौतमधर्मसूत्रम् – 1/2/11–14
15. तत्रैव – 1/2/18
16. तत्रैव – 1/2/22
17. तत्रैव – 1/2/25–27
18. तत्रैव – 1/2/30
19. तत्रैव – 1/2/33–35
20. तत्रैव – 1/2/45
21. तत्रैव – 1/2/51–52
22. तत्रैव – 1/2/54–55
23. मनुस्मृतिः – 2/ 245–246
24. तैत्तिरीयोपनिषद्, शिक्षा–वल्ली, अनुवाकः–11
25. श्रीमद्भागवतपुराणम्, दशमस्कन्धः – 45/26
26. तत्रैव – 45/29
27. तत्रैव – 45/31
28. तत्रैव–45/36
29. तत्रैव–45/37
30. तत्रैव–45/46
31. तत्रैव–45/47–48
32. रघुवंशम् – 3/28

**सहायकाचार्या, ज्योतिषविभागः**

श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्
गीर–सोमनाथः, गुजरातम